# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ११३

अयोध्यां तु समालोक्य चिन्तयामास राघवः ।
चिन्तयित्वा ततो दृष्टिं वानरेषु न्यपातयत् ॥ १॥

प्रियकामः प्रियं रामस्ततस्त्वरितविक्रमम् ।
उवाच धीमांस्तेजस्वी हनूमन्तं प्लवङ्गमम् ॥ २॥

अयोध्यां त्वरितो गच्छ क्षिप्रं त्वं प्लवगोत्तम ।
जानीहि कच्चित्कुशली जनो नृपतिमन्दिरे ॥ ३॥

शृङ्गवेरपुरं प्राप्य गुहं गहनगोचरम् ।
निषादाधिपतिं ब्रूहि कुशलं वचनान्मम ॥ ४॥

श्रुत्वा तु मां कुशलिनमरोगं विगतज्वरम् ।
भविष्यति गुहः प्रीतः स ममात्मसमः सखा ॥ ५॥

अयोध्यायाश्च ते मार्गं प्रवृत्तिं भरतस्य च ।
निवेदयिष्यति प्रीतो निषादाधिपतिर्गुहः ॥ ६॥

भरतस्तु त्वया वाच्यः कुशलं वचनान्मम ।
सिद्धार्थं शंस मां तस्मै सभार्यं सहलक्ष्मणम् ॥ ७॥

हरणं चापि वैदेह्या रावणेन बलीयसा ।
सुग्रीवेण च संवादं वालिनश्च वधं रणे ॥ ८॥

मैथिल्यन्वेषणं चैव यथा चाधिगता त्वया ।
लङ्घयित्वा महातोयमापगापतिमव्ययम् ॥ ९॥

उपयानं समुद्रस्य सागरस्य च दर्शनम् ।
यथा च कारितः सेतू रावणश्च यथा हतः ॥ १०॥

वरदानं महेन्द्रेण ब्रह्मणा वरुणेन च ।
महादेवप्रसादाच्च पित्रा मम समागमम् ॥ ११॥

जित्वा शत्रुगणान्रामः प्राप्य चानुत्तमं यशः ।
उपयाति समृद्धार्थः सह मित्रैर्महाबलः ॥ १२॥

एतच्छ्रुत्वा यमाकारं भजते भरतस्ततः ।
स च ते वेदितव्यः स्यात्सर्वं यच्चापि मां प्रति ॥ १३॥

ज्ञेयाः सर्वे च वृत्तान्ता भरतस्येङ्गितानि च ।
तत्त्वेन मुखवर्णेन दृष्ट्या व्याभाषणेन च ॥ १४॥

सर्वकामसमृद्धं हि हस्त्यश्वरथसङ्कुलम् ।
पितृपैतामहं राज्यं कस्य नावर्तयेन्मनः ॥ १५॥

सङ्गत्या भरतः श्रीमान्राज्येनार्थी स्वयं भवेत् ।
प्रशास्तु वसुधां सर्वामखिलां रघुनन्दनः ॥ १६॥

तस्य बुद्धिं च विज्ञाय व्यवसायं च वानर ।
यावन्न दूरं याताः स्मः क्षिप्रमागन्तुमर्हसि ॥ १७॥

इति प्रतिसमादिष्टो हनूमान्मारुतात्मजः ।
मानुषं धारयन्रूपमयोध्यां त्वरितो ययौ ॥ १८॥

लङ्घयित्वा पितृपथं भुजगेन्द्रालयं शुभम् ।
गङ्गायमुनयोर्भीमं संनिपातमतीत्य च ॥ १९॥

शृङ्गवेरपुरं प्राप्य गुहमासाद्य वीर्यवान् ।
स वाचा शुभया हृष्टो हनूमानिदमब्रवीत् ॥ २०॥

सखा तु तव काकुत्स्थो रामः सत्यपराक्रमः ।
ससीतः सह सौमित्रिः स त्वां कुशलमब्रवीत् ॥ २१॥

पञ्चमीमद्य रजनीमुषित्वा वचनान्मुनेः ।
भरद्वाजाभ्यनुज्ञातं द्रक्ष्यस्यद्यैव राघवम् ॥ २२॥

एवमुक्त्वा महातेजाः सम्प्रहृष्टतनूरुहः ।
उत्पपात महावेगो वेगवानविचारयन् ॥ २३॥

सोऽपश्यद्रामतीर्थं च नदीं वालुकिनीं तथा ।
गोमतीं तां च सोऽपश्यद्भीमं सालवनं तथा ॥ २४॥

स गत्वा दूरमध्वानं त्वरितः कपिकुञ्जरः ।
आससाद द्रुमान्फुल्लान्नन्दिग्रामसमीपजान् ॥ २५॥

क्रोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनाम्बरम् ।

ददर्श भरतं दीनं कृशमाश्रमवासिनम् ॥ २६ ॥

जटिलं मलदिग्धाङ्गं भ्रातृव्यसनकर्शितम् ।
फलमूलाशिनं दान्तं तापसं धर्मचारिणम् ॥ २७ ॥

समुन्नतजटाभारं वल्कलाजिनवाससं ।
नियतं भावितात्मानं ब्रह्मर्षिसमतेजसं ॥ २८ ॥

पादुके ते पुरस्कृत्य शासन्तं वै वसुन्धराम् ।
चतुर्वर्ण्यस्य लोकस्य त्रातारं सर्वतो भयात् ॥ २९ ॥

उपस्थितममात्यैश्च शुचिभिश्च पुरोहितैः ।
बलमुख्यैश्च युक्तैश्च काषायाम्बरधारिभिः ॥ ३० ॥

न हि ते राजपुत्रं तं चीरकृष्णाजिनाम्बरम् ।
परिमोक्तुं व्यवस्यन्ति पौरा वै धर्मवत्सलाः ॥ ३१ ॥

तं धर्ममिव धर्मज्ञं देववन्तमिवापरम् ।
उवाच प्राञ्जलिर्वाकयं हनूमान्मारुतात्मजः ॥ ३२ ॥

वसन्तं दण्डकारण्ये यं त्वं चीरजटाधरम् ।
अनुशोचसि काकुत्स्थं स त्वा कुशलमब्रवीत् ॥ ३३ ॥

प्रियमाख्यामि ते देव शोकं त्यक्ष्यसि दारुणम् ।
अस्मिन्मुहूर्ते भ्रात्रा त्वं रामेण सह सङ्गतः ॥ ३४ ॥

निहत्य रावणं रामः प्रतिलभ्य च मैथिलीम् ।
उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ ३५ ॥

लक्ष्मणश्च महातेजा वैदेही च यशस्विनी ।
सीता समग्रा रामेण महेन्द्रेण शची यथा ॥ ३६ ॥

एवमुक्तो हनुमता भरतः कैकयीसुतः ।
पपात सहसा हृष्टो हर्षान्मोहं जगाम ह ॥ ३७ ॥

ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः ।
हनूमन्तमुवाचेदं भरतः प्रियवादिनम् ॥ ३८ ॥

अशोकजैः प्रीतिमयैः कपिमालिङ्ग्य सम्भ्रमात् ।
सिषेच भरतः श्रीमान्विपुलैरश्रुबिन्दुभिः ॥ ३९ ॥

देवो वा मानुषो वा त्वमनुक्रोशादिहागतः ।
प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियम् ॥ ४० ॥

गवां शतसहस्रं च ग्रामाणां च शतं परम् ।
सकुण्डलाः शुभाचारा भार्याः कन्याश्च षोडश ॥ ४१ ॥

हेमवर्णाः सुनासोरूः शशिसौम्याननाः स्त्रियः ।
सर्वाभरणसम्पन्ना सम्पन्नाः कुलजातिभिः ॥ ४२ ॥

निशम्य रामागमनं नृपात्मजः
कपिप्रवीरस्य तदाद्भुतोपमम् ।
प्रहर्षितो रामदिदृक्षयाभवत्
पुनश्च हर्षादिदमब्रवीद्वचः ॥ ४३ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com